# संस्कृत-वार्ता:

**दिनाङ्कः-06.10.2023** **सायं : 06:20**

**मुख्यवार्ता**

- भारतीय-रिजर्व-बैंक इत्यस्य मौद्रिकनीते: समीक्षोपवेशने 'रेपो दर' इत्यस्मिन् परिवर्तनं विनैव सार्धषट्प्रतिशतस्य गणनाङ्क: पूर्ववदेव स्थापितोऽस्ति।
- केन्द्रेन जलाप्लवनेन ग्रसिताय सिक्किम-राज्याय आपत् सहयोगरूपेण पञ्चचत्वारिंशत् कोटिरूप्यकाणां सहयोगः कृतः। राशिरियं अस्मै सत्राय राज्य-आपदुद्धार-सहयोग-कोषात् केन्द्रीय पक्षतः भागराशिः अस्ति ।
- केन्द्रीय-वाणिज्योद्योग मन्त्रिणा पीयूष-गोयलेन उक्तं यत् भारत-संयुक्त-अरब-अमीरातयो: मध्ये मैत्रिभावेन सहयोगेन च कार्याचरणस्य अवसरा: उपलभ्यन्ते।
- चीनदेशस्य हांग्चोओ-नगरे समायोज्यमानायां एशियाईक्रीडायां भारतेन आहत्य ऐतिहासिकरूपेण त्रिनवति:(93) पदकानि सञ्चितानि

**मौद्रिकनीति:/आरबीआई**

भारतीय-रिजर्व-बैंक इत्यस्य मौद्रिकनीते: समीक्षोपवेशने 'रेपो दर' इत्यस्मिन् परिवर्तनं विनैव सार्धषट्प्रतिशतस्य गणनाङ्क: पूर्ववदेव स्थापितोऽस्ति। उपवेशनमिदं आर.बी.आई इत्यस्य मौद्रिकनीतिसमित्या: द्विमासिकोपवेशनम् आसीत्। यस्मिन् प्रतिदानप्रतिशते निर्णयो नीत:। मुम्बई-समित्या: उपवेशनान्तरं आरबीआईप्रमुखेण शक्तिकान्त-दासेन प्रोक्तं यत् ऋणप्रतिदानम् अपरिवर्तितमेव स्थास्यतीति। आरबीआई-पक्षत: प्रसारितवक्तव्यानुसारं व्यापकरूपेण आर्थिक-वित्तीयानाञ्च घटनाक्रमणां विस्तृतानुशीलनानन्तरं समित्या सातत्येन चतुर्थे द्विमासिकोपवेशनेऽपि प्रतिदानराशे: प्रतिशतं यथावदेव स्थापितम्।

**सिक्किम- जलाप्लावनम्**

केन्द्रेन जलाप्लवनेन ग्रसिताय सिक्किम-राज्याय आपत् सहयोगरूपेण पञ्चचत्वारिंशत् कोटिरूप्यकाणां सहयोगः कृतः। राशिरियं अस्मै सत्राय राज्य-आपदुद्धार-सहयोग-कोषात् केन्द्रीय पक्षतः भागराशिः अस्ति । केंद्रीय-गृहमंत्रालयेन हानेः आकलनाय एकम् अन्त:मंत्रालयीय केन्द्रीय दलम् घटितमस्ति। गृह मंत्रालयेन ज्ञापितम् यत् दलमिदं शीघ्रमेव सिक्किमस्य जलाप्लवितक्षेत्राणां यात्रां विधास्यति, अस्याकलनाधारेण राज्याय अतिरिक्त केन्द्रीय सहायताऽपि स्वीकरिष्यते। विनाशकारिणा आकस्मिकजलप्रलयेन एकोनविंशति जनाः मृताः। राज्य-आपदुद्धार-प्रबन्धनविभागेनोक्तं यत्, सैनिकान् सम्मेल्य आहत्य त्र्याधिकैकशतं(103) जनाः लुप्ताः सन्तीति।

**पीयूष गोयल:**

केन्द्रीय-वाणिज्योद्योग मन्त्रिणा पीयूष-गोयलेन उक्तं यत् भारत-संयुक्त-अरब-अमीरातयो: मध्ये मैत्रिभावेन सहयोगेन च कार्याचरणस्य अवसरा: उपलभ्यन्ते। अद्य आबूधाबी चैंबर इत्यनेन आयोजिते भारत-संयुक्त-अरब-अमीरातयो: शीर्ष-उद्यमीनां उपवेशनं सम्बोधयता मंत्रिणा उक्तं यत् सहयोगात्मकोऽयं सम्बन्ध: भारत-संयुक्त-अरब-अमीरातयो: मध्ये खाद्य-सुरक्षा, शिक्षा:, ऊर्जा-सुरक्षा, जलवायु-परिवर्तनस्य समस्या-समाधानाय अन्तरिक्ष-प्रौद्योगिक्या: महत्वपूर्ण-क्षेत्राधारितं वर्तते। अद्य तेनोक्तं यत् स्टार्टप-विंशति:, बी-विंशति:, यू.ए.ई.-इंडिया बिजनेस काउंसिल, भारत-बाजार इत्येतादृशा: उपक्रमा: उभयो: देशयो: मध्ये महत्वपूर्णां भूमिकां निभालयिष्यन्ति। तेनोक्तं यत् अनेन पारस्परिक-सम्बन्धेन उभयो: देशयो: मध्ये व्यापक-आर्थिक-सहयोगितायै एक: दृढाधार: निर्मीयते। केन्द्रीय-मंत्रिणा उक्तं यत् चत्वारिंशत् कोट्यधिक एकार्बुदं यावत् आकाक्षि-नागरिकै: साकं भारतम् एकेन बृहत्तम-आपण-रूपेण संयुक्त-अरब-अमीरात देशाय व्यापार क्षेत्रं प्रददाति। तेन उद्यमिन: अस्यावसरस्य लाभग्रहणाय प्रोत्साहिता:। श्रीगोयलेन उक्तं यत् भारतेन विश्वस्य बृहत्तमा पञ्चमी अर्थव्यवस्थात्वेन प्रतिस्थापन-यात्रायां उल्लेखनीचयार्थिक-विकास: कृत:।

**विश्वमस्तिष्कपक्षाघातदिवसः**

अद्यास्ति विश्वमस्तिष्कपक्षाघातदिवस:। सेब्रलपाल्सी इत्यमुं प्रति जागरूकताभिवर्धनाय दिवसोऽयं विश्वस्मिन् अक्टूबर मासस्य षष्ठे दिनाङ्के परिपाल्यते। अस्य वर्षस्य केन्द्रीयभाव: वर्तते 'टुगेदर स्ट्रांगर 'इति' इत्युक्ते ऐक्यभावं सशक्तभाव्यमिति। दिवसोऽयं मस्तिष्कपक्षाघातेन पीडितजनैः सह अन्येषां जनानां सहयोगस्य पारस्परिक-समर्थनस्य च महत्वं दर्शयति। अनेन रोगेण पीडित: जन: प्रचलने आत्मनः संतुलनस्थापने च प्राय: असमर्थः भवति।

**अनुराग ठाकुर**

खेलमन्त्रिणा अनुरागसिंहठाकुरेण एशियाई क्रीडास्पर्धासु बाणसंघाने कांस्यपदकप्राप्तौ महिलादलं वर्धापितम्। स्मरणीयमस्ति यत् अस्यां स्पर्धायां भारत-पक्षतः अङ्किता- भकत, भजनकौर, सिमरनजीत कौर इत्येता: शरसन्धयित्र्यः युवत्य प्रतिभागित्वम् अकुर्वन्। श्रीठाकुरेण एकस्मिन् संचारतन्त्रे उक्तं यत् दशोत्तर-द्विसहस्रतम वर्षानन्तरम् अस्यां स्पर्धायां भारतस्य प्रथमा उपलब्धिः प्रशंसनीया अस्तीति। तेनोक्तं यत् विजयोऽयं अस्मच्छरसंधातृणां कौशलसंकल्पयो: शक्ति परिज्ञापयति।

**तमालपत्रम् / जन्क**

श्रीनगरे तमालपत्रस्य नियन्त्रण-प्रयासाधारितं एकदिवसीयस्य 'प्रसारमाध्यमानां कार्यशाला' इत्यस्य उद्घाटनं विहितम्। कश्मीर-उपत्यकायां राज्यपालस्य सलाहकारेण राजीवराय-भटनागर इत्यनेन उद्घाटनमिदं ह्य: कृतम्। विषयेऽस्मिन जागरूकताभिवर्धनाय अस्मिन् वार्तातन्त्र सम्बद्धानां जनानाञ्च सहभागिताभिवर्धनाय, कश्मीरस्य स्वास्थ्य सेवा निदेशालयेन कार्यशालेयं घटिताऽस्ति। अवसरेऽस्मिन् भटनागरेण उक्तं यत् तमालपत्रस्य दुष्प्रभावै: परिरक्षणाय हितधारकैः सह समन्वय: महत्वपूर्ण अस्तीति। अनेनैव सह तेन अन्येऽपि नैके उपायाः परिज्ञापिताः।

**मुम्बई/गोरेगांव**

मुम्बई-नगरे गोरेगांव इत्यत्र आजादोद्यानस्य समीपे एकस्मिन् सप्त-तलात्माके भवने अद्य प्रात: अग्निकाण्डे सप्त-जना: मृत्युमुपगता:, चत्वारिंशत् जनाश्च व्रणिता:। पञ्च जनानां स्थिति: गम्भीरा अस्ति इति उच्येत। एक-पञ्चाशत् जना: संरक्षिता। भवनस्य अद्य: आपणे सामग्रिषु, वाहनेषु च अग्निदोषम जायत।

**नोबेल-शान्ति-पुरस्कार:/नर्गेस**

ईरानस्य मानवाधिकार-कार्यकर्त्री नर्गिस-मोहम्मदी इत्यस्यै महिलानां-उत्पीडनं विरुध्य संघर्षाय विंशति: त्रयोविंशति: वर्षस्यास्य नोबेल-शान्ति-पुरस्कार: प्रदत्त:। सा सम्प्रति कारागारे एवास्ति, सा नोबेल पुरस्कार: प्राप्तकर्त्री ऊनविंशति तमा महिला अस्ति। सा ईरानस्य प्रमुखेषु मानवाधिकार कार्यकर्तृषु अन्यतमास्ति। सुश्री-मोहम्मदी त्रयोदश-बारं कारागृहं गता, पञ्च-बारं तस्यां दोषा: सिद्धा:, आहत्य एकत्रिंशत् वर्षाणि यावत् कारागृहगमनेन सह विभिन्नै: दण्डै: दण्डिता। नॉर्वे देशीयेन-नोबेल समित्या ईराने महिलोत्पीडनं विरुध्य संघर्षाय, सर्वेषां कृते मानवाधिकाराय, च नर्गिस मोहम्मदी इत्यस्यै पुरस्कार-प्रदानस्य निर्णय: कृत:।

**<u>एशियाई क्रीडाः :</u>**

चीनदेशस्य हांग्चोओ-नगरे समायोज्यमानायां एशियाईक्रीडायां भारतेन आहत्य ऐतिहासिकरूपेण त्रिनवतिः(93) पदकानि सञ्चितानि, येषु 21 स्वर्ण, 33 रजत, 39 कांस्यपदकानि च सन्ति सम्प्रति पदकगणनायां भारतं चतुर्थस्थाने अस्ति। भारतं स्वस्य 100 पदकानां लक्ष्यं प्रति द्रुतगत्या वरीवर्धते।

अद्य शरसन्धान-क्रीडायां भारतीय-रिकर्व् इति वर्गीय-महिला-दलेन पराजयानन्तरं कांस्यपदकं प्राप्तम्। यत्र पुरुषदलेन दक्षिणकोरियां विरुध्य अन्तिमपक्षे रजतपदकं प्राप्तम्। भारतस्य महिलादलं थाईलैण्ड्-देशं विरुध्य पराजय सेपकताक्रो इति -क्रीडायाम् उपान्तिमचक्रे कांस्यपदकं प्राप्तवत्।

सोनमः महिलानां मुक्तशैल्यात्मकायां 62 -किलोग्रामभारात्मक-मल्लयुद्ध-क्रीडायां चीनदेशस्य लाङ्गजियां विरुध्य 7-5 इति अङ्कान्तरालेन कांस्यपदकं प्राप्तवती। किरण बिश्नोई महिला मुक्तशैल्याः 76 किलोग्रामवर्गे मङ्गोलियादेशस्य अरिउंजर्गल-गनबातं विरुध्य 6-3 इति अङ्केन कांस्यपदकं प्राप्तवती।

बैडमिण्टन्-क्रीडायां एच्.एस. प्रणयः कांस्यपदकं प्राप्तवान्। पुरुषक्रिकेट्-क्रीडायां भारतं उपान्तिमचक्रीय-क्रीडायां बाङ्गलादेशं 9 क्रीडकैः पराजितवत्, अन्तिम-क्रीडायै च योग्यता प्राप्तास्ति। कबड्डीक्रीडायां भारतस्य पुरुषदलेन पाकिस्तानं पराभूय अन्तिमचक्रे प्रवेशो लब्धः। हॉकी-क्रीडायां भारतीयपुरुषदलं स्वर्णपदकाय जापानदेशेन सह क्रीडिष्यति।

**॥ ति वार्ता: ॥**